শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ একাশীতিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ একাশীতিতমঃ সর্গঃ ॥

## ইন্দ্রজিতা মাযামযসীতাযা ৱধঃ

ৱিজ্ঞায তু মনস্তস্য রাঘৱস্য মহাত্মনঃ।
স নিৱৃত্যাহৱাৎ তস্মাৎ প্রৱিৱেশ পুরং ততঃ॥ **6.81.1** ॥

সোঽনুস্মৃত্য ৱধং তেষাং রাক্ষসানাং তরস্বিনাম্।
ক্রোধতাম্রেক্ষণঃ শূরো নির্জগামাথ রাৱণিঃ॥ **6.81.2** ॥

স পশ্চিমেন দ্বারেণ নির্যযৌ রাক্ষসৈর্ৱৃতঃ।
ইন্দ্রজিৎ সুমহাৱীর্যঃ পৌলস্ত্যো দেৱকণ্টকঃ॥ **6.81.3** ॥

ইন্দ্রজিত্তু ততো দৃষ্টৱা ভ্রাতরৌ রামলক্ষ্মণৌ।
রণাযাভ্যুদ্যতৌ ৱীরৌ মাযাং প্রাদুষ্করোৎ তদা॥ **6.81.4** ॥

ইন্দ্রজিত্তু রথে স্থাপ্য সীতাং মাযামযীং তদা।
বলেন মহতাৱৃত্য তস্যা ৱধমরোচযৎ॥ **6.81.5** ॥

মোহনার্থং তু সর্ৱেষাং বুদ্ধিং কৃৎৱা সুদুর্মতিঃ।
হন্তুং সীতাং ৱ্যৱসিতো ৱানরাভিমুখো যযৌ॥ **6.81.6** ॥

তং দৃষ্টৱা ৎৱভিনির্যান্তং সর্ৱে তে কাননৌকসঃ।
উৎপেতুরভিসঙ্ক্রুদ্ধাঃ শিলাহস্তা যুযুৎসৱঃ॥ **6.81.7** ॥

হনূমান্ পুরতস্তেষাং জগাম কপিকুঞ্জরঃ।
প্রগৃহ্য সুমহচ্ছৃঙ্গং পর্ব্বতস্য দুরাসদম্॥ **6.81.8**॥

স দদর্শ হতানন্দাং সীতামিন্দ্রজিতো রথে।
একৱেণীধরাং দীনামুপৱাসকৃশাননাম্॥ **6.81.9**॥

পরিক্লিষ্টৈকৱসনামমৃজাং রাঘৱপ্রিযাম্।
রজোমলাভ্যামালিপ্তৈঃ সর্ব্বগাত্রৈর্ৱরস্ত্রিযম্॥ **6.81.10**॥

তাং নিরীক্ষ্য মুহূর্তং তু মৈথিলীমধ্যৱস্য চ।
বভূৱাচিরদৃষ্টা হি তেন সা জনকাত্মজা॥ **6.81.11**॥

অব্রৱীৎ তাং তু শোকার্তাং নিরানন্দাং তপস্বিনীম্।
দৃষ্টৱা রথস্থিতাং দীনাং রাক্ষসেন্দ্রসুতশ্রিতাম্॥ **6.81.12**॥

কিং সমর্থিতমস্যেতি চিন্তযন্ স মহাকপিঃ।
সহ তৈর্ৱানরশ্রেষ্ঠৈরভ্যধাৱত রাৱণিম্॥ **6.81.13**॥

তদ্ ৱানরবলং দৃষ্টৱা রাৱণিঃ ক্রোধমূর্চ্ছিতঃ।
কৃৎৱা ৱিকোশং নিস্ত্রিংশং মূর্ধ্নি সীতামকর্ষযৎ॥ **6.81.14**॥

তাং স্ত্রিযং পশ্যতাং তেষাং তাডযামাস রাক্ষসঃ।
ক্রোশন্তীং রাম রামেতি মাযযা যোজিতাং রথে॥ **6.81.15**॥

গৃহীতমূর্ধজাং দৃষ্টৱা হনূমান্ দৈন্যমাগতঃ।
দুঃখজং ৱারি নেত্রাভ্যামুৎসৃজন্ মারুতাত্মজঃ॥ **6.81.16**॥

তাং দৃষ্টৱা চারুসর্ৱাঙ্গীং রামস্য মহিষীং প্রিযাম্।
অব্রৱীৎ পরুষং ৱাক্যং ক্রোধাদ্ রক্ষোধিপাত্মজম্॥ **6.81.17**॥

দুরাত্মন্নাত্মনাশায কেশপক্ষে পরামৃশঃ।
ব্রহ্মর্ষীণাং কুলে জাতো রাক্ষসীং যোনিমাশ্রিতঃ॥ **6.81.18**॥

ধিক্ ৎৱাং পাপসমাচারং যস্য তে মতিরীদৃশী।
নৃশংসানার্য দুর্ৱৃত্ত ক্ষুদ্র পাপপরাক্রম।
অনার্যস্যেদৃশং কর্ম ঘৃণা তে নাস্তি নির্ঘৃণ॥ **6.81.19** ॥

চ্যুতা গৃহাচ্চ রাজ্যাচ্চ রামহস্তাচ্চ মৈথিলী।
কিং তৱৈষাপরাদ্ধা হি যদেনাং হংসি নির্দয॥ **6.81.20** ॥

সীতাং হৎৱা তু ন চিরং জীৱিষ্যসি কথঞ্চন।
ৱধার্হ কর্মণা তেন মম হস্তগতো হ্যসি॥ **6.81.21** ॥

যে চ স্ত্রীঘাতিনাং লোকা লোকৱধ্যৈশ্চ কুৎসিতাঃ।
ইহ জীৱিতমুৎসৃজ্য প্রেত্য তান্ প্রতি লপ্স্যসে॥ **6.81.22** ॥

ইতি ব্রুৱাণো হনুমান্ সাযুধৈর্হরিভির্ৱৃতঃ।
অভ্যধাৱৎ সুসঙ্ক্রুদ্ধো রাক্ষসেন্দ্রসুতং প্রতি॥ **6.81.23** ॥

আপতন্তং মহাৱীর্যং তদনীকং ৱনৌকসাম্।
রক্ষসাং ভীমকোপানামনীকেন ন্যৱারযৎ॥ **6.81.24** ॥

স তাং বাণসহস্রেণ ৱিক্ষোভ্য হরিৱাহিনীম্।
হনূমন্তং হরিশ্রেষ্ঠমিন্দ্রজিৎ প্রত্যুৱাচ হ॥ **6.81.25** ॥

সুগ্রীৱস্ত্বং চ রামশ্চ যন্নিমিত্তমিহাগতাঃ।
তাং ৱধিষ্যামি ৱৈদেহীমদ্যৈৱ তৱ পশ্যতঃ॥ **6.81.26** ॥

ইমাং হৎৱা ততো রামং লক্ষ্মণং ৎৱাং চ ৱানর।
সুগ্রীৱং চ ৱধিষ্যামি তং চানার্যং ৱিভীষণম্॥ **6.81.27** ॥

ন হন্তৱ্যাঃ স্ত্রিযশ্চেতি যদ্ ব্রৱীষি প্লৱঙ্গম।
পীডাকরমমিত্রাণাং যচ্চ কর্তৱ্যমেৱ তৎ॥ **6.81.28** ॥

তমেৱমুক্ত্বা রুদতীং সীতাং মাযামযীং চ তাম্।
শিতধারেণ খড্গেন নিজঘানেন্দ্রজিৎ স্বযম্॥ **6.81.29** ॥

যজ্ঞোপৱীতমার্গেণ ছিন্না তেন তপস্বিনী।
সা পৃথিৱ্যাং পৃথুশ্রোণী পপাত প্রিযদর্শনা॥ **6.81.30** ॥

তামিন্দ্রজিৎ স্ত্রিযং হৎৱা হনূমন্তমুৱাচ হ।
মযা রামস্য পশ্যেমাং প্রিযাং শস্ত্রনিষূদিতাম্।
এষা ৱিশস্তা ৱৈদেহী নিষ্ফলো ৱঃ পরিশ্রমঃ॥ **6.81.31** ॥

ততঃ খড্গেন মহতা হৎৱা তামিন্দ্রজিৎস্বযম্।
হৃষ্টঃ স রথমাস্থায ননাদ চ মহাস্বনম্॥ **6.81.32** ॥

ৱানরাঃ শুশ্রুৱুঃ শব্দমদূরে প্রত্যৱস্থিতাঃ।
ৱ্যাদিতাস্যস্য নদতস্তদ্দুর্গং সংশ্রিতস্য তু॥ **6.81.33** ॥

তথা তু সীতাং ৱিনিহত্য দুর্মতিঃ
 প্রহৃষ্টচেতাঃ স বভূৱ রাৱণিঃ।
তং হৃষ্টরূপং সমুদীক্ষ্য ৱানরা
 ৱিষণ্ণরূপাঃ সমভিপ্রদুদ্রুৱুঃ॥ **6.81.34** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে একাশীতিতমঃ সর্গঃ ॥